सप्तमः पाठः

# अतिथिदेवो भव

भारतीयसंस्कृतौ अतिथीनां नितरां महत्त्वम् अस्ति। अतिथिदेवो भव इति उपनिषदः वचनम् अस्ति। अस्माकं देशे न केवलं मनुष्याः, अपि तु अन्ये प्राणिनः अपि अतिथिभावेन पूज्यन्ते। अतिथिसेवा पञ्चमहायज्ञेषु अन्तर्भवति। 'अतिथिदेवो भव' इति वचनेन अतिथिसेवायाः भावः सर्वेषु जागरितः भवति। तादृशः कश्चन प्रसङ्गः अत्र पाठे दर्शितः।


राधिका एषु दिनेषु कूर्दमाना **एव** चलति। **यतः** गृहे नूतनाः अतिथयः सन्ति। ते **च** विशिष्टाः सन्ति। माता, पुत्रौ, पुत्र्यौ **च** मिलित्वा ते **तत्र** पञ्च सन्ति। अहोरात्रं तस्याः चिन्ता **एकत्र एव**। गृहस्य छद्याः **उपरि**। **तत्र एव** तस्याः मनः अस्ति। कुतूहलम् अस्ति, के ते **इति** ? ते **न** अन्ये, **काचित्** मार्जारी तस्याः चत्वारः शावकाः **च**। **आम्**, ते **एव** विशिष्टाः अतिथयः। सा **तु** तेषां नामानि **अपि** चिन्तितवती – तन्वी, मृद्वी, शबलः, भीमः **च इति**।



© NCERT not to be republished



तन्वी आकृत्या सुन्दरी, मृद्वी स्पर्शेन **अतीव** कोमला। शबल: चित्रवर्ण: **तथा च** भीम: **किञ्चित्** स्थूल:। मार्जारी कदा गच्छति, **कदा** आगच्छति एतत् सर्वम् **अपि** राधिका जानाति। सा मार्जार्यै क्षीरं ददाति। मार्जारी पिबति। अनन्तरं सा सधन्यवादं राधिकां पश्यति। **किन्तु** शावकानां समीपं राधिका गच्छति **चेत्** मन्दं मन्दं **पृष्ठत:** आगच्छति। राधिकां दृष्ट्वा शावका: भीता: **न** भवन्ति। पितामही राधिकाया: कार्यकलापान् दृष्ट्वा हसति।



सा राधिकां वदति – राधिके ! अतिथय: **कदा** आगच्छन्ति **इति न** जानीम:। **किन्तु यदा** ते **अत्र** आगच्छन्ति **तदा** तेषाम् एतादृशी सेवा करणीया। राधिका पितामह्या: कण्ठं **परित:** मालाम् **इव** हस्तौ स्थापयन्ती पृच्छति – अस्तु, करोमि। **किन्तु** किमर्थम् ? मातामही वदति – 'अतिथिदेवो भव'। अर्थात् अतिथि: अस्माकं देव: अस्ति **इति** चिन्तयतु। तस्य आदरेण सेवां करोतु। राधिका आदिनं मन्त्रम् **इव** वारं वारं वदति – अतिथिदेवो भव। अतिथिदेवो भव। अनन्तरं सा तन्वीं मृद्वीं शबलं भीमं **च** वात्सल्येन वदति – जानन्ति **किम्** ? अतिथिदेवो भव। भवन्त: **अपि** वदन्तु – '**अतिथिदेवो भव**'।





© NCERT not to be republished

## वयं शब्दार्थान् जानीमः

| शब्दः | अर्थः | हिन्दी | अंग्रेजी | मातृभाषया अर्थं लिखन्तु |
|---|---|---|---|---|
| कूर्दमाना | उच्छलनं कुर्वती | कूदती हुई | Jumping | |
| नूतनाः | नवीनाः | नये | New | |
| मिलित्वा | सम्मिल्य | मिलकर | Together | |
| अहोरात्रम् | अहर्निशम् | दिन-रात | Day and night | |
| छद्याः उपरि | गृहस्य उपरितने भागे | छत के ऊपर | On the roof | |
| शावकाः | मार्जारस्य शिशवः | बिल्ली के बच्चे | Kitten | |
| मन्दं मन्दम् | शनैः शनैः | धीरे-धीरे | Slowly | |
| पृष्ठतः | पृष्ठभागतः | पीछे-पीछे | From the back | |
| कार्यकलापान् | गतिविधीन् | गतिविधियों को | Activities | |
| दृष्ट्वा | अवलोक्य | देखकर | Having Seen | |
| एतादृशाः | एतैः समानाः | इस तरह के | Like these | |
| स्थापयन्ती | स्थापनं कुर्वती | डालती हुई | Putting | |
| किमर्थम् | किं निमित्तम् | क्यों / किसलिए | Why | |
| आदिनम् | सम्पूर्णं दिनम् | दिन भर | Whole day | |
| वारं वारम् | पुनः पुनः | बार-बार | Again and again | |

© NCERT not to be republished



## वयम् अभ्यासं कुर्मः

१. **पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि एकपदेन लिखन्तु।**

(क) राधिका कथं चलति स्म ?

(ख) गृहे कति अतिथयः सन्ति ?

(ग) कां दृष्ट्वा शावकाः भीताः न भवन्ति ?

(घ) मार्जार्याः कति शावकाः ?

(ङ) राधिका मार्जार्यै किं ददाति ?

(च) चित्रवर्णः कः अस्ति ?

२. **पाठस्य आधारेण अधोलिखितानां प्रश्नानाम् उत्तराणि पूर्णवाक्येन लिखन्तु।**

(क) मार्जारीशावकानां नामानि कानि ?

(ख) राधिका मार्जारीशावकान् किं पाठयति ?

(ग) विशिष्टा: अतिथय: के ?

(घ) पितामही राधिकां किं वदति ?

(ङ) मार्जारी कदा राधिकाया: पृष्ठत: आगच्छति ?

(च) मार्जार्या: शावका: कीदृशा: सन्ति ?

३. **अधोलिखितानां वाक्यानां प्रश्न-सूचक-वाक्यानि लिखन्तु।**

**यथा**- लेखनी अत्र अस्ति। .......... लेखनी कुत्र अस्ति .......... ?

(क) वृक्ष: तत्र अस्ति। ........................................ ?

(ख) देवालय: अन्यत्र अस्ति। ........................................ ?

(ग) वायु: सर्वत्र अस्ति। ........................................ ?

(घ) बालका: एकत्र तिष्ठन्ति। ........................................ ?

(ङ) माता अत्र अस्ति। ........................................ ?

४. **उत्पीठिकायां किम् अस्ति? किं नास्ति ? इति चित्रं दृष्ट्वा लिखन्तु।**

**यथा** - **उत्पीठिकायां पुस्तकम् अस्ति।**

**उत्पीठिकायां घटी नास्ति।**

(पुस्तकम्, घटी, लेखनी, चषक:, कूपी, स्यूत:, सङ्गणकम्, वृक्ष:, फलम्, कन्दुक:)



© NCERT not to be republished

५. **रेखाचित्रं दृष्ट्वा उदाहरणानुसारं वाक्यानि लिखन्तु।**

**यथा** - मार्जार: कुत्र अस्ति ? मार्जार: अत्र अस्ति।

सेवक: कुत्र अस्ति ? सेवक: तत्र अस्ति।

कुत्र?

**अत्र**
छात्र:, मार्जार:, काक:, दीपक:, घट:, सुधाखण्ड:, शिक्षक:, बालिका, लेखनी, माला

**तत्र**
सेवक:, विद्यालय:, गायक:, घटी, फलम्, गृहम्, वाटिका, हरिण:, अज:, मूषक:

**सर्वत्र**
प्रकाश:, परमेश्वर:, ज्ञानम्, आकाश:, अणव:, प्रकृति:, पुष्पाणि, वायु:, प्रेम

**एकत्र**
बालक:, मयूर:, मित्रम्, पुत्र:, महिला, सेविका, चटका, दोला

© NCERT not to be republished

६. **भोजनशालायां किं किम् अस्ति ? इति पञ्चभि: वाक्यै: लिखन्तु।**

**यथा - भोजनशालायां पाचक: अस्ति।**

(सूचकपदानि - पाचक:, पात्रम्, तण्डुला:, शाकानि, अग्नि:, जलम्)

७. **अधोलिखितेभ्य: वाक्येभ्य: अव्ययपदानि चित्वा लिखन्तु।**

(क) अमित: गृहात् बहि: गच्छति। ..............................

(ख) एक: वानर: वृक्षस्य उपरि तिष्ठति। ..............................

(ग) स: फलानि अध: क्षिपति। ..............................

(घ) तत्र एक: बिडाल: अस्ति। ..............................

(ङ) बिडाल: गृहस्य अन्त: प्रविशति। ..............................

८. उदाहरणानुसारं क: कुत्र अस्ति? कुत्र नास्ति ? इति लिखन्तु ।

यथा -

| | | | |
|---|---|---|---|
| सिंह: | वने | कार्यालये | सिंह: वने अस्ति । कार्यालये नास्ति । |
| छात्र: | आकाशे | विद्यालये | छात्र: आकाशे नास्ति । छात्र: विद्यालये अस्ति । |
| मत्स्य: | समुद्रे | वृक्षे | |
| मधुरता | लड्डुके | कषाये | |
| उष्णता | सूर्ये | चन्द्रे | |
| वानर: | नद्याम् | वृक्षे | |
| नौका | जले | पर्वते | |
| अज्ञानम् | पण्डिते | मूर्खे | |
| चन्द्र: | अमावस्यायाम् | पूर्णिमायाम् | |
| अवकाश: | सोमवासरे | रविवासरे | |



## योग्यताविस्तर:

१. एतत् गीतं सर्वेऽपि मिलित्वा पठन्तु आलपन्तु च ।

मार्जाल ! रे मार्जाल ! कुत्र गतोऽसि त्वम्
अत्रैवास्मि आगतोऽस्मि राजगृहादेवम्
मार्जाल ! रे मार्जाल ! किं दृष्टं तत्र ?
तावद्दीर्घ: मूषकपुत्र: न हि दृष्टोऽन्यत्र ।



© NCERT not to be republished

२. **पाठे स्थूलाक्षरैः लिखिताः शब्दाः अव्ययपदानि सन्ति। 'अत्र' इति अव्ययं परिशीलयामः।**

- **अत्र** बालकः अस्ति।
- **अत्र** बालकाः सन्ति।

द्वयोः वाक्ययोः 'अत्र' इति पदे वचनभेदः नास्ति

- **अत्र** गायिका गायति।
- **अत्र** गायकः गायति।

द्वयोः वाक्ययोः 'अत्र' इति पदे लिङ्गभेदः नास्ति

- **अत्र** सुधाखण्डेन लेखनं भवति।
- **अत्र** गृहेषु स्वच्छता भवति।

द्वयोः वाक्ययोः 'अत्र' इति पदे विभक्तिभेदः नास्ति

३. **अव्ययलक्षणम्**

**सदृशं त्रिषु लिङ्गेषु सर्वासु च विभक्तिषु।**
**वचनेषु च सर्वेषु यन्न व्येति तदव्ययम्॥**

अव्ययपदेषु वचनभेदः, विभक्तिभेदः लिङ्गभेदः च न भवति। एतानि अव्ययपदानि सर्वदा समानरूपेण वाक्ये भवन्ति।

४. **निम्नलिखितानि वाक्यानि सावधानं पठन्तु लिखन्तु च।**

- छात्रः अत्र अस्ति।
- क्रीडाङ्गणं तत्र अस्ति।
- कन्दुकः कुत्र अस्ति ?
- नगरम् अन्यत्र अस्ति।
- परमेश्वरः सर्वत्र अस्ति।
- भोजनम् अत्र नास्ति।



© NCERT not to be republished



## परियोजनाकार्यम्

- पाठे मार्जारशावकानां नामानि पश्यन्तु। तेषां नामकरणे राधिकाया: किं चिन्तनम् आसीत् ? तदनुसारं स्वनामधेये किम् उद्देश्यं स्यात् इति विमर्शं कुर्वन्तु।
- विद्यालयपरिसरे किम् अस्ति, किं नास्ति इति लिखन्तु कक्षायां च श्रावयन्तु।

### बिडाल: कुत्र अस्ति ?



उपरि




अध:




कोणे



केन्द्रे




समीपे



दूरे



अन्त:



बहि:



पुरत:



पृष्ठत:



दक्षिणत:



वामत:

© NCERT not to be republished